वत्पूगमालिना। अगस्त्याचरितामाशाम् अनाशास्यजयो ययौ। स सैन्यपरिभोगेण गजदानसुगन्धिना। कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत्। बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः। मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः"। "कावेरीतीरभूमीरुहभुजगवधूभुक्तमुक्तावशिष्टः" मलयजवातवर्णने "ततो गच्छेत कावेरीं वृतामप्सरसां गणैः। तत्र स्नात्वा नरो राजन्! गोसहस्रफलं लभेत्" भा० व० ८५। गङ्गे! च यमुने! चैव गोदावरि! सरस्वति! नर्म्मदे! सिन्धु! कावेरि! जलेऽस्मिन् सन्निधिं कुरु, तीर्थवाहन मन्त्र

**काव्य** पु० कवेः भृगुपुत्रस्यापत्यम् यञ्। शुक्रे अमरः "भृगोः पुत्रः कविर्विद्वान् शुक्रः कविसुतग्रहः" भा०आ०६०। "जिगीषया ततोदेवाववव्रिरेऽङ्गिरसं मुनिम्। पौरोहित्येन याज्यार्थे काव्यं तूशनसं परे" भा०आ०७५अ०। कवेरिदम् यञ्। २कविसम्बन्धिनि। कव—वर्णने स्तुतौ च कर्म्मणि ण्यत्। ३वर्णनीये ४स्तुत्ये च त्रि० स्त्रियां टाप् "दुर्य्योधनस्य रूपेण शृणु काव्यां गिरं मम" भा०स० ६०अ०। "भाष्याणि तर्कयुक्तानि देहवन्ति विशांपते!। नाटका विविधाः काव्याः कथाख्यायिककारिकाः" भा०स०११अ०। शार्ङ्गरवादौ तु काव्यशब्दस्य यञन्तस्यैव ग्रहणात् ततः स्त्रियां ङीन्। कवेः कर्म्म ष्यञ्। कविकृतगद्यपद्यात्मके ५ वाक्यविशेषे न। काव्यप्र०तत्करणप्रयोजनमुक्तं यथा—

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे" मू०

"कालिदासादीनामिव यशः, श्रीहर्षादेर्धावकादीनामिव धनं, राजादिगतोचिताचारपरिज्ञानम्, आदित्यादेर्म्मयूरादीनामिवानर्थनिवारणं, सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दं, प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्य्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकविकर्म्म, तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवत् वर्त्तितव्यं न रावणादिवदित्युपदेशञ्च, यथायोगं कवेः सहृदयस्य च करोतीति सर्व्वथा तत्र यतनीयम्। अस्य कारणमाह" वृत्तिः

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्। काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे" मू०

"शक्तिः कवित्वबीजरूपः संस्कारविशेषः, यां विना काव्यं न प्रसरेत् प्रसृतं वा उपहसनीयं स्यात्, लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य, शास्त्राणां छन्दोव्याकरणाभिधानकोषकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रन्थानां, काव्यानाञ्च महाकविसम्बन्धिनाम्, आदिग्रहणादितिहासादीनाञ्च विमर्शनाद्व्युत्पत्तिः, काव्यं कर्त्तुं विचारयितुञ्च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरिति त्रयः समुदिताः न तु व्यस्तास्तस्य काव्यस्योद्भवे निर्म्माणे समुल्लासे च हेतुर्नतु हेतवः" वृत्तिः

सा०द० अन्यप्रकारं काव्यस्य प्रयोजनं मुक्तं यथा

"चतुर्व्वर्गफलप्राप्तिः सुखादल्पधियामपि। काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते" स्रू०।

"चतुर्व्वर्गफलप्राप्तिर्हि काव्यतो रामादिवत् प्रवर्त्तितव्यं न रावणादिवदित्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेण सुप्रतीतैव। उक्तञ्च "धर्म्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च। करोति कीर्त्तिं प्रीतिञ्च साधुकाव्यनिषेवणमिति"। किञ्च काव्याद्धर्म्मप्राप्तिर्भगवन्नारायणचरणारविन्दस्तवादिना "एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके च कामधुग्भवति" इत्यादिवेदवाक्येभ्यश्च सुप्रसिद्धैव। अर्थप्राप्तिश्च प्रत्यक्षसिद्धा। कामप्राप्तिश्चार्थद्वारैव। मोक्षप्राप्तिश्चैतज्जन्यधर्म्मफलाननुसन्धानात् मोक्षोपयोगिवाक्ये व्युत्पत्त्याधायकत्वाच्च। चतुर्वर्गप्राप्तिर्हि वेदशास्त्रेभ्यो नीरसतया दुःखादेव परिणतबुद्धीनामेव जायते। परमानन्दसन्दोहजनकतया सुखादेव सुकुमारबुद्धीनामपि पुनः काव्यादेव। ननु तर्हि परिणतबुद्धिभिः सत्सु वेदशास्त्रेषु काव्येषु किमिति यत्नः करणीय इत्यपि न वक्तव्यम् कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात्। किञ्च। काव्यस्योपादेयत्वमाग्नेयपुराणेऽप्युक्तम्। "नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा। कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभेति" "त्रिवर्गसाधनं नाट्यमिति" च। विष्णुपुराणे "काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च। शब्दमूर्त्तिधरस्यैते विष्णोरंशा महात्मनः" इति वृत्तिः। तस्य लक्षणं तत्रैव "वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः। उत्कर्षहेतवः प्रोक्ता गुणालङ्कार रीतयः" स्रू०।

अन्ये तु गुणालङ्काररीतियुक्तं दोषरहितं वाक्यं का-